# gAyatrIstotram 2

# ગાયત્રીસ્તોત્રમ્ ૨

## Document Information

Text title : gAyatrIstotram 2

File name : gAyatrIstotram2.itx

Category : devii, gAyatrI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# ગાયત્રીસ્તોત્રમ્ ૨

નારદ ઉવાચ ।
ભક્તાનુકમ્પિન્ સર્વજ્ઞ હૃદયં પાપનાશનમ્ ।
ગાયત્ર્યા કથિતં તસ્માદ્ગાયત્ર્યાઃ સ્તોત્રમીરય ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
આદિશક્તે જગન્માતર્ભક્તાનુગ્રહકારિણિ ।
સર્વત્ર વ્યાપિકેઽનન્તે શ્રીસન્ધ્યે તે નમોઽસ્તુ તે ॥ ૨॥

ત્વમેવ સન્ધ્યા ગાયત્રી સાવિત્રી ચ સરસ્વતી ।
બ્રાહ્મી ચ વૈષ્ણવી રૌદ્રી રક્તા શ્વેતા સિતેતરા ॥ ૩॥

પ્રાતર્બાલા ચ મધ્યાહ્ને યૌવનસ્થા ભવેત્પુનઃ ।
વૃદ્ધા સાયં ભગવતી ચિન્ત્યતે મુનિભિઃ સદા ॥ ૪॥

હંસસ્થા ગરુડારૂઢા તથા વૃષભવાહિની ॥

ઋગ્વેદાધ્યાયિની ભૂમૌ દૃશ્યતે યા તપસ્વિભિઃ ॥ ૫॥

યજુર્વેદં પઠન્તી ચ અન્તરિક્ષે વિરાજતે ।
સા સામગાપિ સર્વેષુ ભ્રામ્યમાણા તથા ભુવિ ॥ ૬॥

રુદ્રલોકં ગતા ત્વં હિ વિષ્ણુલોકનિવાસિની ।
ત્વમેવ બ્રહ્મણો લોકેઽમર્ત્યાનુગ્રહકારિણી ॥ ૭॥

સપ્તર્ષિપ્રીતિજનની માયા બહુવરપ્રદા ।
શિવયોઃ કરનેત્રોત્થા હ્યશ્રુસ્વેદસમુદ્ભવા ॥ ૮॥

આનન્દજનની દુર્ગા દશધા પરિપઠ્યતે ।
વરેણ્યા વરદા ચૈવ વરિષ્ઠા વરવર્ણિની ॥ ૯॥

ગરિષ્ઠા ચ વરાહા ચ વરારોહા ચ સપ્તમી ।
નીલગઙ્ગા તથા સન્ધ્યા સર્વદા ભોગમોક્ષદા ॥ ૧૦॥

ભાગીરથી મત્યર્લોકે પાતાલે ભોગવત્યપિ ।
ત્રિલોકવાહિની દેવી સ્થાનત્રયનિવાસિની ॥ ૧૧॥

ભૂર્લોકસ્થા ત્વમેવાસિ ધરિત્રી લોકધારિણી ।
ભુવો લોકે વાયુશક્તિઃ સ્વર્લોકે તેજસાં નિધિઃ ॥ ૧૨॥

મહર્લોકે મહાસિદ્ધિર્જનલોકેઽજનેત્યપિ ।
તપસ્વિની તપોલોકે સત્યલોકે તુ સત્યવાક્ ॥ ૧૩॥

કમલા વિષ્ણુલોકે ચ ગાયત્રી બ્રહ્મલોકદા ।
રુદ્રલોકે સ્થિતા ગૌરી હરાર્ધાંગનિવાસિની ॥ ૧૪॥

અહમો મહતશ્ચૈવ પ્રકૃતિસ્ત્વં હિ ગીયસે ।
સામ્યાવસ્થાત્મિકા ત્વં હિ શબલબ્રહ્મરૂપિણી ॥ ૧૫॥

તતઃ પરા પરાશક્તિઃ પરમા ત્વં હિ ગીયસે ।
ઇચ્છાશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિસ્ત્રિશક્તિદા ॥ ૧૬॥

ગઙ્ગા ચ યમુના ચૈવ વિપાશા ચ સરસ્વતી ।
શરયુર્દેવિકા સિન્ધુર્નર્મદેરાવતી તથા ॥ ૧૭॥

ગોદાવરી શતદ્રુશ્ચ કાવેરી દેવલોકગા ।
કૌશિકા ચન્દ્રભાગા ચ વિતસ્તા ચ સરસ્વતી ॥ ૧૮॥

ગણ્ડકી તપિની તોયા ગોમતી વેત્રવત્યપિ ।
ઇડા ચ પિઙ્ગલા ચૈવ સુષુમ્ના ચ તૃતીયકા ॥ ૧૯॥

ગાન્ધારી હસ્તજિહ્વા ચ પૂષાઽપૂષા તથૈવ ચ ।
અલમ્બુષા કુહૂશ્ચૈવ શઙ્ખિની પ્રાણવાહિની ॥ ૨૦॥

નાડી ચ ત્વં શરીરસ્થા ગીયસે પ્રાક્તનૈર્બુધૈઃ ।
હૃત્પદ્મસ્થા પ્રાણશક્તિઃ કણ્ઠસ્થા સ્વપ્નનાયિકા ॥ ૨૧॥

તાલુસ્થા ત્વં સદાધારા બિન્દુસ્થા બિન્દુમાલિની ॥

મૂલે તુ કુણ્ડલીશક્તિવ્યાપિની કેશમૂલગા ॥ ૨૨॥

શિખામધ્યાસના ત્વં હિ શિખાગ્રે તુ મનોન્મની ।
કિમન્યદ્બહુનોક્તેન યત્કિઞ્ચિજ્જગતીત્રયે ॥ ૨૩॥

તત્સર્વં ત્વં મહાદેવિ શ્રિયે સન્ધ્યે નમોઽસ્તુતે ।

ઇતીદં કીર્તિદં સ્તોત્રં સન્ધ્યાયાં બહુપુણ્યદમ્ ॥ ૨૪॥

મહાપાપપ્રશમનં મહાસિદ્ધિવિધાયકમ્ ।
ય ઇદં કીર્તયેત્ સ્તોત્રં સન્ધ્યાકાલે સમાહિતઃ ॥ ૨૫॥

અપુત્રઃ પ્રાપ્નુયાત્પુત્રં ધનાર્થી ધનમાપ્નુયાત્ ।
સર્વતીર્થતપોદાનયજ્ઞયોગફલં લભેત્ ॥ ૨૬॥

ભોગાન્ભુક્ત્વા ચિરં કાલમન્તે મોક્ષમવાપ્નુયાત્ ।
તપસ્વિભિઃ કૃતં સ્તોત્રં સ્નાનકાલે તુ યઃ પઠેત્ ॥ ૨૭॥

યત્ર કુત્ર જલે મગ્નઃ સન્ધ્યામજ્જનજં ફલમ્ ।
લભતે નાત્ર સન્દેહઃ સત્યં સત્યં ચ નારદ ॥ ૨૮॥

શ‍ૃણુયાદ્યોઽપિ તદ્ભક્ત્યા સ તુ પાપાત્પ્રમુચ્યતે ।
પીયૂષસદૃશં વાક્યં સન્ધ્યોક્તં નારદેરિતમ્ ॥ ૨૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે શ્રીગાયત્રીસ્તોત્રવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

Proofread by Nat Natarajan, NA

---

*gAyatrIstotram 2*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*